चिन्तयन्-न्ती, चिचिन्तयिषन्-न्ती, [1]चिन्तन्[A]-न्ती, चिचिन्तिषन्-न्ती ; —
चिन्तयिष्यन्-न्ती-ती, चिचिन्तयिषिष्यन्-न्ती-ती, चिन्तिष्यन्-न्ती-ती ;
चिचिन्तिषिष्यन्-न्ती-ती ;—
चिन्तयमानः, चिचिन्तयिषमाणः—चेचिन्त्यमानः ;
चिन्तयिष्यमाणः चिचिन्तयिषिष्यमाणः—चेचिन्तिष्यमाणः;
[2]चिन्-चिन्तौ-चिन्तः; — — —
चिन्तितम्-तः, चिचिन्तयिषितः, चिन्तितः, चिचिन्तिषितः, चेचिन्तितः-तवान् ;
चिन्तः, चिचिन्तयिषुः, चिन्तः, चिचिन्तिषुः, चेचिन्तः ;
चिन्तयितव्यम्, चिचिन्तयिषितव्यम्, चिन्तितव्यम्, चिचिन्तिषितव्यम्,
चेचिन्तितव्यम् ;
चिन्तनीयम्, चिचिन्तयिषणीयम्, चिन्तनीयम्, चिचिन्तिषणीयम्,
चेचिन्तनीयम् ;
चिन्त्यम्, चिचिन्तयिष्यम्, चिन्त्यम्, चिचिन्तिष्यम्, चेचिन्त्यम् ;
ईषच्चिन्तः-दुश्चिन्तः-सुचिन्तः ; — —
चिन्त्यमानः, चिचिन्तयिष्यमाणः, चिन्त्यमानः चिचिन्तिष्यमाणः,
चेचिन्त्यमानः ;
चिन्तः, चिचिन्तयिषः, चिन्तः, चिचिन्तिषः, चेचिन्तः ;
चिन्तयितुम्, चिचिन्तयिषितुम्, चिन्तितुम्, चिचिन्तिषितुम्, चेचिन्तितुम् ;
[3]चिन्ता,[B] चिन्तना, [4]चिचिन्तयिषा, चिन्ता, चिचिन्तिषा, चेचिन्ता ;
चिन्तनम्, चिचिन्तयिषणम्, चिन्तनम्, चिचिन्तिषणम्, चेचिन्तनम् ;
चिन्तयित्वा, चिचिन्तयिषित्वा, चिन्तित्वा, चिचिन्तिषित्वा, चेचिन्तित्वा ;
विचिन्त्य, विचिचिन्तयिष्य, विचिन्त्य, विचिचिन्तिष्य, विचेचिन्त्य ;

---

1. णिजभावपक्षे, शुद्धाद्धातोः, 'शेषात् कर्तरि—' (1-3-78) इति शतैव ।
2. संयोगान्तलोपे रूपम् । न च नलोपः शङ्क्यः ; संयोगान्तलोपस्यासिद्धत्वात् ।
3. 'चिन्तिपूजिकथिकुम्बिचर्चश्च' (3-3-105) इति अङ् । युजपवादः ।
4. 'चिन्तिपूजि' (3-3-105) इति सूत्रे चकारस्यानुक्तसमुच्चयार्थकत्वेन कदाचित् युजपि भवति । तेन चिन्तना इत्यपि साधुरिति काशिका ।

A. 'सञ्चोरयन्तमरिगर्वमशेषभद्रं चिन्तन्तमन्तकमिवाप्तमयन्त्र्यवीर्यम् ।' धा.का.3-13.
B. 'चिन्तावन्तः कथां चक्रुरुपधाभेदभीरवः ।' भ. का. 7.72